# Sanyasa Upanishad

# સંન્યાસોપનિષત્

## Document Information

Text title : Sanyasa Upanishad

File name : sanyasa.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 65 / 108; Sama veda - sanyasa upanishad

Latest update : July 20, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# સંન્યાસોપનિષત્

સંન્યાસોપનિષદ્વેદ્યં સંન્યાસિપટલાશ્રયમ્ ।
સત્તાસામાન્યવિભવં સ્વમાત્રમિતિ ભાવયે ॥

ૐ આપ્યાયન્તુ મામાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ
શ્રોત્રમથો બલમિન્દ્રિયાણિ ચ ॥ સર્વાણિ સર્વં બ્રહ્મોપનિષદં
માહં બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોદનિરાકરણ-
મસ્ત્વનિરાકરણં મેસ્તુ તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે
મયિ સન્તુ તે મયિ સન્તુ । ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ અથાતઃ સંન્યાસોપનિષદં વ્યાખ્યાસ્યામો
યોઽનુક્રમેણ સંન્યસ્યતિ સ સંન્યસ્તો ભવતિ । કોઽયં સંન્યાસ
ઉચ્યતે કથં સંન્યસ્તો ભવતિ । ય આત્માનં ક્રિયાભિર્ગુપ્તં કરોતિ
માતરં પિતરં ભાર્યાં પુત્રાન્બન્ધૂનનુમોદયિત્વા યે
ચાસ્યર્ત્વિજસ્તાન્સર્વાંશ્ચ પૂર્વવત્પ્રાણિત્વા વૈશ્વાનરેષ્ટિં
નિર્વપેત્સર્વસ્વં દદ્યાદ્યજમાનસ્ય ગા ઋત્વિજઃ સર્વૈઃ પાત્રૈઃ
સમારોપ્ય યદાહવનીયે ગાર્હપત્યે વાન્વહાર્યપચને
સભ્યાવસથ્યોશ્ચ પ્રાણાપાનવ્યાનોદાનસમાનાન્સર્વાન્સર્વેષુ
સમારોપયેત્ । સશિખાન્કેશાન્વિસૃજ્ય યજ્ઞોપવીતં છિત્ત્વા પુત્રં
દૃષ્ટ્વા ત્વં યજ્ઞસ્ત્વં સર્વમિત્યનુમન્ત્રયેત્ ।
યદ્યપુત્રો ભવત્યાત્માનમેવેમં ધ્યાત્વાઽનવેક્ષમાણઃ
પ્રાચીમુદીચિં વા દિશં પ્રવ્રજેચ્ચ । ત્રિષુ વર્ણેષુ
ભિક્ષાચર્યં ચરેત્ । પાણિપાત્રેણાનાશનં કુર્યાત્ ।
ઔષધવદહનમાચરેત્ । ઔષધવદશનં પ્રાશ્નીયાત્ ।
યથાલાભમશ્નીયાત્પ્રાણસન્ધારણાર્થં યથા મેદોવૃદ્ધિર્ન
જાયતે । કૃશો ભૂત્વા ગ્રામ એકરાત્રં નગરે પઞ્ચરાત્રં
ચતુરોમાસાન્વાર્ષિકાન્ગ્રામે વા નગરે વાપિ વસેત્ ।
વિશીર્ણવસ્ત્રં વલ્કલં વા પ્રતિગૃહ્ણીયાનાન્યત્પ્રતિગૃહ્ણીયાદ્યદ્યશક્તો

ભવતિ ક્લેશતસ્તપ્યતે  તપ ઇતિ । યો વા એવં ક્રમેણ સંન્યસ્યતિ યો વા
એવં પશ્યતિ કિમસ્ય યજ્ઞોપવીતં કાસ્ય શિખા કથં વાસ્યોપસ્પર્શનમિતિ ।
તં હોવાચેદમેવાસ્ય તદ્યજ્ઞોપવીતં યદાત્મધ્યાનં વિદ્યા શિખા
નીરૈઃ સર્વત્રાવસ્થિતૈઃ કાર્યં નિર્વર્તયન્નુદરપાત્રેણ જલતીરે નિકેતનમ્ ।
બ્રહ્મવાદિનો વદન્ત્યસ્તમિત આદિત્યે કથં વાસ્યોપસ્પર્શનમિતિ ।
તાન્હોવાચ યથાહનિ તથા રાત્રૌ નાસ્ય નક્તં ન દિવા તદપ્યેતદૃષિણોક્તમ્ ।
સંકૃદ્દિવા હૈવાસ્મૈ ભવતિ ય એવંવિદ્વાનેતેનાત્માનં સંધત્તે ॥

ઇતિ પ્રથમોઽધ્યાયઃ ॥ ૧॥

ૐ ચત્વારિંષત્સંસ્કારસમ્પન્નઃ સર્વતો
વિરક્તશ્ચિત્તશુદ્ધિમેત્યાશાસૂયેર્ષ્યાહંકારં
દગ્ધ્વા સાધનચતુષ્ટયસમ્પન્ન એવ સંન્યસ્તુમર્હતિ ।
સંન્યાસં નિશ્ચયં કૃત્વા પુનર્ન ચ કરોતિ યઃ ।
સ કુર્યાત્કૃચ્છ્રમાત્રં તુ પુનઃ સંન્યસ્તુમર્હતિ ।, ૧॥

સંન્યાસં પાતયેદ્યસ્તુ પતિતં ન્યાસયેત્તુ યઃ ।
સંન્યાસવિઘ્નકર્તા ચ ત્રીનેતાન્પતિતાન્વિદુઃ ॥ ૨॥ ઇતિ॥

અથ ષણ્ડઃ પતિતોઽઙ્ગવિકલઃ સ્ત્રૈણો બધિરોઽર્ભકો મૂકઃ
પાષણ્ડશ્ચક્રી લિઙ્ગી કુષ્ઠી વૈખાનસહરદ્વિજૌ
ભૃતકાધ્યાપકઃ શિપિવિષ્ટોઽનગ્નિકો નાસ્તિકો વૈરાગ્યવન્તોઽપ્યેતે
ન સંન્યાસાર્હાઃ । સંન્યસ્તા યદ્યપિ મહાવાક્યોપદેશે નાધિકારિણઃ ॥

આરૂઢપતિતાપત્યં કુનખી શ્યાવદન્તકઃ ।
ક્ષીબસ્તથાઙ્ગવિકલો નૈવ સંન્યસ્તુમર્હતિ ॥ ૩॥

સમ્પ્રત્યવસિતાનાં ચ મહાપાતકિનાં તથા ।
વ્રાત્યાનામભિશસ્તાનાં સંન્યાસં ન કારયેત્ ॥ ૪॥

વ્રતયજ્ઞતપોદાનહોમસ્વાધ્યાયવર્જિતમ્ ।
સત્યશૌચપરિભ્રષ્ટં સંન્યાસં ન કારયેત્ ॥ ૫॥

એતે નાર્હન્તિ સંન્યાસમાતુરેણ વિના ક્રમમ્ ।
ૐ ભૂઃ સ્વાહેતિ શિખામુત્પાટ્ય યજ્ઞોપવીતં
બહિર્ન નિવસેત્ । યશો બલં જ્ઞાનં વૈરાગ્યં
મેધાં પ્રયચ્છેતિ યજ્ઞોપવીતં છિત્ત્વા ૐ ભૂઃ

સ્વાહેત્યપ્સુ વસ્ત્રં કટિસૂત્રં ચ વિસૃજ્ય સંન્યસ્તં
મયેતિ ત્રિવારમભિમન્ત્રયેત્ ।
સંન્યાસિનં દ્વિજં દૃષ્ટ્વા સ્થાનાચ્ચલતિ ભાસ્કરઃ ।
એષ મે મણ્ડલં ભિત્ત્વા પરં બ્રહ્માધિગચ્છતિ ॥ ૬॥

ષષ્ટિં કુલાન્યતીતાનિ ષષ્ટિમાગામિકાનિ ચ ।
કુલાન્યુદ્ધરતે પ્રાજ્ઞઃ સંન્યસ્તમિતિ યો વદેત્ ॥ ૭॥

યે ચ સન્તાનજા દોષા યે દોષા દેહસંભવાઃ ।
પ્રૈષાગ્નિર્નિર્દહેત્સર્વાંસ્તુષાગ્નિરિવ કાઞ્ચનમ્ ॥ ૮॥

સખા મા ગોપાયેતિ દણ્ડં પરિગ્રહેત્ ।
દણ્ડં તુ વાણવં સૌમ્યં સત્વચં સમપર્વકમ્ ।
પુણ્યસ્થલસમુત્પન્નં નાનાકલ્મષશોધિતમ્ ॥ ૯॥

અદગ્ધમહતં કીટૈઃ પર્વગ્રન્થિવિરાજિતમ્ ।
નાસાદઘ્નં શિરસ્તુલ્યં ભ્રુવોર્વા બિભૃયાદ્યતિઃ ॥ ૧૦॥

દણ્ડાત્મનોસ્તુ સંયોગઃ સર્વથા તુ વિધીયતે ।
ન દણ્ડેન વિના ગચ્છેદિષુક્ષેપત્રયં બુધઃ ॥ ૧૧॥

જગજ્જીવનં જીવનાધારભૂતં માતે મામન્ત્રયસ્વ સર્વસૌમ્યેતિ
કમણ્ડલું પરિગૃહ્ય યોગપટ્ટાભિષિક્તો ભૂત્વા યથાસુખં વિહરેત્ ॥

ત્યજ ધર્મમધર્મં ચ ઉભે સત્યાનૃતે ત્યજ ।
ઉભે સત્યાનૃતે ત્યક્ત્વા યેન ત્યજસિ તત્ત્યજ ॥ ૧૨॥

વૈરાગ્યસંન્યાસી જ્ઞાનસંન્યાસી જ્ઞાનવૈરાગ્યસંન્યાસી
કર્મસંન્યાસીતિ ચાતુર્વિધ્યમુપાગતઃ । તદ્યથેતિ દૃષ્ટાનુશ્રવિક-
વિષયવૈતૃષ્ણ્યમેત્ય પ્રાક્પુણ્યકર્મવિશેષાત્સંન્યસ્તઃ
સ વૈરાગ્યસંન્યાસી । શાસ્ત્રજ્ઞાનાત્પાપપુણ્યલોકાનુભવશ્રવણા-
ત્પ્રપઞ્ચોપરતો દેહવાસનાં શાસ્ત્રવાસનાં લોકવાસનાં ત્યક્ત્વા
વમનાન્નમિવ પ્રવૃત્તિં સર્વં હેયં મત્વા સાધનચતુષ્ટયસમ્પન્નો
યઃ સંન્યસ્યતિ સ એવ જ્ઞાનસંન્યાસી । ક્રમેણ સર્વમભ્યસ્ય સર્વમનુભૂય
જ્ઞાનવૈરાગ્યાભ્યાં સ્વરૂપાનુસન્ધાનેન દેહમાત્રાવશિષ્ટઃ સંન્યસ્ય
જાતરૂપધરો ભવતિ સ જ્ઞાનવૈરાગ્યસંન્યાસી । બ્રહ્મચર્યં સમાપ્ય
ગૃહી ભૂત્વા વાનપ્રસ્થાશ્રમમેત્ય વૈરાગ્યાભાવેઽપ્યાશ્રમક્રમાનુસારેણ

યઃ સંન્યસ્યતિ સ કર્મસંન્યાસી । સ સંન્યાસઃ ષડ્વિધો ભવતિ
કુટીચકબહૂદકહંસપરમહંસતુરીયાતીતાવધૂતાશ્ચેતિ । કુટીચકઃ
શિખાયજ્ઞોપવીતિ દણ્ડકમણ્ડલુધરઃ કૌપીનશાટીકન્થાધરઃ
પિતૃમાતૃગુર્વારાધનપરઃ પિઠરખનિત્રશિક્યાદિમાત્રસાધનપર
એકત્રાન્નાદનપરઃ શ્વેતોર્ધ્વપુણ્ડ્રધારી ત્રિદણ્ડઃ । બહૂદકઃ શિખાદિકન્થાધર-
સ્ત્રિપુણ્ડ્રધારી કુટીચકવત્સર્વસમો મધુકરવૃત્ત્યાષ્ટકવલાશી ।
હંસો જટાધારી ત્રિપુણ્ડ્રોર્ધ્વપુણ્ડ્રધારી અસંક્લૃપ્તમાધૂકરાન્નાશી
કૌપીનખણ્ડતુણ્ડધારી । પરમહંસઃ શિખાયજ્ઞોપવીતરહિતઃ પઞ્ચગૃહેષુ
કરપાત્રી એકકૌપીનધારી શાટીમેકામેકં વૈણવં દણ્ડમેકશાટીધરો વા
ભસ્મોદ્ધૂલનપરઃ સર્વત્યાગી તુરીયાતીતો ગોમુખવૃત્ત્યા ફલાહારી અન્નાહારી
ચેદ્ગૃહત્રયે દેહમાત્રાવશિષ્ટો દિગંબરઃ કુણપવચ્છરીન્વૃત્તિકઃ ।
અવધૂતસ્ત્વનિયમઃ પતિતાભિશસ્તવર્જનપૂર્વકં સર્વવર્ણેષ્વજગરવૃત્ત્યાહારપરઃ સ્વરૂપાનુસન્ધાનપરઃ ।
જગત્તાવદિદં નાહં સવૃક્ષતૃણપર્વતમ્ । યદ્બાહ્યં
જડમત્યન્તં તત્સ્યાં કથમહં વિભુઃ ॥ ૧૩ ॥

કાલેનાલ્પેન વિલયી દેહો નાહમચેતનઃ ।
જડયા કર્ણશષ્કુલ્યા કલ્પમાનક્ષણસ્થયા ॥ ૧૪ ॥

શૂન્યાકૃતિઃ શૂન્યભવઃ શબ્દો નાહમચેતનઃ ।
ત્વચા ક્ષણવિનાશિન્યા પ્રાપ્યોઽપ્રાપ્યોઽયમન્યથા ॥ ૧૫ ॥

ચિત્પ્રસાદોપલબ્ધાત્મા સ્પર્શો નાહમચેતનઃ ।
લબ્ધાત્મા જિહ્વયા તુચ્છો લોલયા લોલસત્તયા ॥ ૧૬ ॥

સ્વલ્પસ્યન્દો દ્રવ્યનિષ્ઠો રસો નાહમચેતનઃ ।
દૃશ્યદર્શનયોર્લીનં ક્ષયિક્ષણવિનાશિનોઃ ॥ ૧૭ ॥

કેવલે દ્રષ્ટરિ ક્ષીણં રૂપં નાહમચેતનમ્ ।
નાસયા ગન્ધજડયા ક્ષયિણ્યા પરિકલ્પિતઃ ॥ ૧૮ ॥

પેલવો નિયતાકારો ગન્ધો નાહમચેતનઃ ।
નિર્મમોઽમનનઃ શાન્તો ગતપઞ્ચેન્દ્રિયભ્રમઃ ॥ ૧૯ ॥

શુદ્ધચેતન એવાહં કલાકલનવર્જિતઃ ।
ચૈત્યવર્જિતચિન્માત્રમહમેષોઽવભાસકઃ ॥ ૨૦ ॥

સબાહ્યાભ્યન્તરવ્યાપી નિષ્કલોઽહં નિરઞ્જનઃ ।

નિર્વિકલ્પચિદાભાસ એક આત્માસ્મિ સર્વગઃ ॥ ૨૧॥

મયૈવ ચેતનેનેમે સર્વે ઘટપટાદયઃ ।
સૂર્યાન્તા અવભાસ્યન્તે દીપેનેવાત્મતેજસા ॥ ૨૨॥

મયૈવૈતાઃ સ્ફુરન્તીહ વિચિત્રેન્દ્રિયવૃત્તયઃ ।
તેજસાન્તઃપ્રકાશેન યથાગ્નિકણપઙ્ક્તયઃ ॥ ૨૩॥

અનન્તાનન્દસંભોગા પરોપશમશાલિની ।
શુદ્ધેયં ચિન્મયી દૃષ્ટિર્જયત્યખિલદૃષ્ટિષુ ॥ ૨૪॥

સર્વભાવાન્તરસ્થાય ચૈત્યમુક્તચિદાત્મને ।
પ્રત્યક્ચૈતન્યરૂપાય મહ્યમેવ નમો નમઃ ॥ ૨૫॥

વિચિત્રાઃ શક્તયઃ સ્વચ્છાઃ સમા યા નિર્વિકારયા ।
ચિતા ક્રિયન્તે સમયા કલાકલનમુક્તયા ॥ ૨૬॥

કાલત્રયમુપેક્ષિત્ર્યા હીનાયાશ્ચૈત્યબન્ધનૈઃ ।
ચિતશ્ચૈત્યમુપેક્ષિત્ર્યાઃ સમતૈવાવશિષ્યતે ॥ ૨૭॥

સા હિ વાચામગમ્યત્વાદસત્તામિવ શાશ્વતીમ્ ।
નૈરાત્મસિદ્ધાત્મદશામુપયાતૈવ શિષ્યતે ॥ ૨૮॥

ઈહાનીહામયૈરન્તર્યા ચિદાવલિતા મલૈઃ ।
સા ચિન્નોત્પાદિતું શક્તા પાશબદ્ધેવ પક્ષિણી ॥ ૨૯॥

ઇચ્છાદ્વેષસમુત્થેન દ્વન્દ્વમોહેન જન્તવઃ ।
ધરાવિવરમગ્નાનાં કીટાનાં સમતાં ગતાઃ ॥ ૩૦॥

આત્મનેઽસ્તુ નમો મહ્યમવિચ્છિન્નચિદાત્મને ।
પરામૃષ્ટોઽસ્મિ લબ્ધોઽસ્મિ પ્રોદિતોઽસ્મ્યચિરાદહમ્ ।
ઉદ્ધૃતોઽસ્મિ વિકલ્પેભ્યો યોઽસ્મિ સોઽસ્મિ નમોઽસ્તુ તે ॥ ૩૧॥

તુભ્યં મહ્યમનન્તાય મહ્યં તુભ્યં ચિદાત્મને ।
નમસ્તુભ્યં પરેશાય નમો મહ્યં શિવાય ચ ॥ ૩૨॥

તિષ્ઠન્નપિ હિ નાસીનો ગચ્છન્નપિ ન ગચ્છતિ ।
શાન્તોઽપિ વ્યવહારસ્થઃ કુર્વન્નપિ ન લિપ્યતે ॥ ૩૩॥

સુલભશ્ચાયમત્યન્તં સુજ્ઞેયશ્ચાપ્તબન્ધુવત્ ।
શરીરપદ્મકુહરે સર્વેષામેવ ષટ્પદઃ ॥ ૩૪॥

ન મે ભોગસ્થિતૌ વાઞ્છા ન મે ભોગવિસર્જને ।
યદાયાતિ તદાયાતુ યત્પ્રયાતિ પ્રયાતુ તત્ ॥ ૩૫॥

મનસા મનસિ ચ્છિન્ને નિરહંકારં ગતે ।
ભાવેન ગલિતે ભાવે સ્વસ્થસ્તિષ્ઠામિ કેવલઃ ॥ ૩૬॥

નિર્ભાવં નિરહંકારં નિર્મનસ્કમનીહિતમ્ ।
કેવલાસ્પન્દશુદ્ધાત્મન્યેવ તિષ્ઠતિ મે રિપુઃ ॥ ૩૭॥

તૃષ્ણારજ્જુગણં છિત્વા મચ્છરીરકપઞ્જરાત્ ।
ન જાને ક્વ ગતોડ્ડીય નિરહંકારપક્ષિણી ॥ ૩૮॥

યસ્ય નાહંકૃતો ભાવો બુદ્ધિર્યસ્ય ન લિપ્યતે ।
યઃ સમઃ સર્વભૂતેષુ જીવિતં તસ્ય શોભતે ॥ ૩૯॥

યોઽન્તઃશીતલયા બુદ્ધ્યા રાગદ્વેષવિમુક્તયા ।
સાક્ષિવત્પશ્યતીદં હિ જીવિતં તસ્ય શોભતે ॥ ૪૦॥

યેન સમ્યક્પરિજ્ઞાય હેયોપાદેયમુજ્ઝતા ।
ચિત્તસ્યાન્તેઽર્પિતં ચિત્તં જીવિતં તસ્ય શોભતે ॥ ૪૧॥

ગ્રાહ્યગ્રાહકસંબન્ધે ક્ષીણે શાન્તિરુદેત્યલમ્ ।
સ્થિતિમભ્યાગતા શાન્તિર્મોક્ષનામાભિધીયતે ॥ ૪૨॥

ભ્રષ્ટબીજોપમા ભૂયો જન્માઙ્કુરવિવર્જિતા ।
હૃદિ જીવદ્વિમુક્તાનાં શુદ્ધા ભવતિ વાસના ॥ ૪૩॥

પાવની પરમોદારા શુદ્ધસત્ત્વાનુપાતિની ।
આત્મધ્યાનમયી નિત્યા સુષુપ્તિસ્થેવ તિષ્ઠતિ ॥ ૪૪॥

ચેતનં ચિત્તરિક્તં હિ પ્રત્યક્ચેતનમુચ્યતે ।
નિર્મનસ્કસ્વભાવત્વાન્ન તત્ર કલનામલમ્ ॥ ૪૫॥

સા સત્યતા સા શિવતા સાવસ્થા પારમાત્મિકી ।
સર્વજ્ઞતા સા સંતૃપ્તિર્નતુ યત્ર મનઃ ક્ષતમ્ ॥ ૪૬॥

પ્રલપન્વિસૃજન્ગૃહ્ણન્નુન્મિષન્નિમિષન્નપિ ।
નિરસ્તમનનાનન્દઃ સંવિન્માત્રપરોઽસ્મ્યહમ્ ॥ ૪૭॥

મલં સંવેદ્યમુત્સૃજ્ય મનો નિર્મૂલયન્પરમ્ ।

આશાપાશાનલં છિત્ત્વા સંવિન્માત્રપરોઽસ્મ્યહમ્ ॥ ૪૮॥

અશુભાશુભસંકલ્પઃ સંશાન્તોઽસ્મિ નિરામયઃ ।
નષ્ટેષ્ટાનિષ્ટકલનઃ સંમાત્રપરોસ્મ્યહમ્ ॥ ૪૯॥

આત્મતાપરતે ત્યક્ત્વા નિર્વિભાગો જગત્સ્થિતૌ ।
વજ્રસ્તંભવદાત્માનમવલંબ્ય સ્થિરોઽસ્મ્યહમ્ ॥ ૫૦॥

નિર્મલાયાં નિરાશાયાં સ્વસંવિત્તૌ સ્થિતોઽસ્મ્યહમ્ ।
ઈહિતાનીહિતૈર્મુક્તો હેયોપાદેયવર્જિતઃ ॥ ૫૧॥

કદાન્તસ્તોષમેષ્યામિ સ્વપ્રકાશપદે સ્થિતઃ ।
કદોપશાન્તમનનો ધરણીધરકન્દરે ॥ ૫૨॥

સમેષ્યામિ શિલાસામ્યં નિર્વિકલ્પસમાધિના ।
નિરંશધ્યાનવિશ્રાન્તિમૂકસ્ય મમ મસ્તકે ॥ ૫૩॥

કદા તાર્ણં કરિષ્યન્તિ કુલાયં વનપુત્રિકાઃ ।
સંકલ્પપાદપં તૃષ્ણાલતં છિત્ત્વા મનોવનમ્ ॥ ૫૪॥

વિતતાં ભુવમાસાદ્ય વિહરાભિ યથાસુખમ્ ।
પદં તદનુ યાતોઽસ્મિ કેવલોઽસ્મિ જયામ્યહમ્ ॥ ૫૫॥

નિર્વાણોઽસ્મિ નિરીહોઽસ્મિ નિરંશોઽસ્મિ નિરીપ્સિતઃ ।
સ્વચ્છતોર્જિતતા સત્તા હૃદ્યતા સત્યતા જ્ઞતા ॥ ૫૬॥

આનન્દિતોપશમતા સદા પ્રમુદિતોદિતા ।
પૂર્ણતોદારતા સત્યા કાન્તિસત્તા સદૈકતા ॥ ૫૭॥

ઇત્યેવં ચિન્તયન્ભિક્ષુઃ સ્વરૂપસ્થિતિમઞ્જસા ।
નિર્વિકલ્પસ્વરૂપજ્ઞો નિર્વિકલ્પો બભૂવ હ ॥ ૫૮॥

આતુરો જીવતિ ચેત્ક્રમસંન્યાસઃ કર્તવ્યઃ ।
ન શૂદ્રસ્ત્રીપતિતોદક્યા સંભાષણમ્ ।
ન યતેર્દેવપૂજનોત્સવદર્શનમ્ ।
તસ્માન્ન સંન્યાસિન એષ લોકઃ ।
આતુરકુટીચકયોર્ભૂલોકભુવર્લોકૌ ।
બહૂદકસ્ય સ્વર્ગલોકઃ ।
હંસસ્ય તપોલોકઃ । પરમહંસસ્ય સત્યલોકઃ ।

તુરીયાતીતાવધૂતયોઃ સ્વાત્મન્યેવ કૈવલ્યં
સ્વરૂપાનુસન્ધાનેન ભ્રમરકીટન્યાયવત્ ।
સ્વરૂપાનુસન્ધાનવ્યતિરિક્તાન્યશાસ્ત્રાભ્યાસ
ઉષ્ટ્રકુંકુમભારવદ્વ્યર્થઃ । ન યોગશાસ્ત્રપ્રવૃત્તિઃ ।
ન સાંખ્યશાસ્ત્રાભ્યાસઃ । ન મન્ત્રતન્ત્રવ્યાપારઃ ।
નેતરશાસ્ત્રપ્રવૃત્તિર્યતેરસ્તિ । અસ્તિ ચેચ્છવાલંકારવ-
ત્કર્માચર વિદ્યાદૂરઃ ।
ન પરિવ્રાણ્નામસંકીર્તનપરો યદ્યત્કર્મ કરોતિ તત્તત્ફલમનુભવતિ ।
એરણ્ડતૈલફેનવત્સર્વં પરિત્યજેત્ । ન દેવતાપ્રસાદગ્રહણમ્ ।
ન બાહ્યદેવાભ્યર્ચનં કુર્યાત્ । સ્વવ્યતિરિક્તં સર્વં ત્યક્ત્વા
મધુકરવૃત્ત્યાહારમાહરન્કૃશીભૂત્વા મેદોવૃદ્ધિમકુર્વન્વિહરેત્ ।
માધૂકરેણ કરપાત્રેણાસ્યપાત્રેણ વા કાલં નયેત્ ।
આત્મસંમિતમાહારમાહરેદાત્મવાન્યતિઃ ।
આહારસ્ય ચ ભાગૌ દ્વૌ તૃતીયમુદકસ્ય ચ ।
વાયોઃ સંચરણાર્થાય ચતુર્થમવશેષયેત્ ॥૫૯॥

ભૈક્ષેણ વર્તયેન્નિત્યં નૈકાન્નાશી ભવેત્ક્વચિત્ ।
નિરીક્ષન્તે ત્વનુદ્વિગ્નાસ્તદ્ગૃહં યત્નતો વ્રજેત્ ॥ ૬૦॥

પઞ્ચસપ્તગૃહાણાં તુ ભિક્ષામિચ્છેત્ક્રિયાવતામ્ ।
ગોદોહમાત્રમાકાઙ્ક્ષેન્નિષ્ક્રાન્તો ન પુનર્વ્રજેત્ ॥ ૬૧॥

નક્તાદ્વરશ્ચોપવાસ ઉપવાસાદયાચિતઃ ।
અયાચિતાદ્વરં ભૈક્ષ્યં તસ્માત્ભૈક્ષેણ વર્ધયેત્ ॥ ૬૨॥

નૈવ સવ્યાપસવ્યેન ભિક્ષાકાલે વિશેદ્ગૃહાન્ ।
નાતિક્રામેદ્ગૃહં મોહાદ્યત્ર દોષો ન વિદ્યતે ॥ ૬૩॥

શ્રોત્રિયાન્નં ન ભિક્ષેત શ્રદ્ધાભક્તિબહિષ્કૃતમ્ ।
વ્રાત્યસ્યાપિ ગૃહે ભિક્ષેચ્છ્રદ્ધાભક્તિપુરસ્કૃતે ॥ ૬૪॥

માધૂકરમસંક્લૃપ્તં પ્રાક્પ્રણીતમયાચિતમ્ ।
તાત્કાલિકં ચોપપન્નં ભૈક્ષં પઞ્ચવિધં સ્મૃતમ્ ॥ ૬૫॥

મનઃસંકલ્પરહિતાંસ્ત્રીન્ગૃહાન્પઞ્ચ સપ્ત વા ।
મધુમક્ષિકવત્કૃત્વા માધૂકરમિતિ સ્મૃતમ્ ॥ ૬૬॥

પ્રાતઃકાલે ચ પૂર્વેદ્યુર્યદ્ભક્તૈઃ પ્રાર્થિતં મુહુઃ ।
તદ્ભૈક્ષં પ્રાક્પ્રણીતં સ્યાત્સ્થિતિં કુર્યાત્તથાપિ વા ॥ ૬૭॥

ભિક્ષાટનસમુદ્યોગાદ્યેન કેન નિમન્ત્રિતમ્ ।
અયાચિતં તુ તદ્ભૈક્ષં ભોક્તવ્યં ચ મુમુક્ષુભિઃ ॥ ૬૮॥

ઉપસ્થાનેન યત્પ્રોક્તં ભિક્ષાર્થં બ્રાહ્મણેન તત્ ।
તાત્કાલિકમિતિ ખ્યાતં ભોક્તવ્યં યતિભિસ્તદા ॥ ૬૯॥

સિદ્ધમન્નં યદાનીતં બ્રાહ્મણેન મઠં પ્રતિ ।
ઉપપન્નમિતિ પ્રાહુર્મુનયો મોક્ષકાઙ્ક્ષિણઃ ॥ ૭૦॥

ચરેન્માધૂકરં ભૈક્ષં યતિર્મ્લેચ્છકુલાદપિ ।
એકાન્નં નતુ ભુઞ્જીત બૃહસ્પતિસમાદપિ ।
યાચિતાયાચિતાભ્યાં ચ ભિક્ષાભ્યાં કલ્પયેત્સ્થિતમ્ ॥ ૭૧॥

ન વાયુઃ સ્પર્શદોષેણ નાગ્નિર્દહનકર્મણા ।
નાપો મૂત્રપુરીષાભ્યાં નાન્નદોષેણ મસ્કરી ॥ ૭૨॥

વિધૂમે સન્નમુસલે વ્યઙ્ગારે ભુક્તવજ્જને ।
કાલેઽપરાહ્ને ભૂયિષ્ઠે ભિક્ષાચરણમાચરેત્ ॥ ૭૩॥

અભિશસ્તં ચ પતિતં પાપણ્ડં દેવપૂજકમ્ ।
વર્જયિત્વા ચરેદ્ભૈક્ષં સર્વવર્ણેષુ ચાપદિ ॥ ૭૪॥

ઘૃતં સ્વમૂત્રસદૃશં મધુ સ્યાત્સુરયા સમમ્ ।
તૈલં સૂકરમૂત્રં સ્યાત્સૂપં લશુનસંમિતમ્ ॥ ૭૫॥

માષાપૂપાદિ ગોમાંસં ક્ષીરં મૂત્રસમં ભવેત્ ।
તસ્માત્સર્વપ્રયત્નેન ઘૃતાદીન્વર્જયેદ્યતિઃ ।
ઘૃતસૂપાદિસંયુક્તમન્નં નાદ્યાત્કદાચન ॥ ૭૬॥

પાત્રમસ્ય ભવેત્પાણિસ્તેન નિત્યં સ્થિતિં નયેત્ ।
પાણિપાત્રશ્ચરન્યોગી નાસકૃદ્ભૈક્ષમાચરેત્ ॥ ૭૭॥

આસ્યેન તુ યદાહારં ગોવન્મૃગયતે મુનિઃ ।
તદા સમઃ સ્યાત્સર્વેષુ સોઽમૃતત્વાય કલ્પતે ॥ ૭૮॥

આજ્યં રુધિરમિવ ત્યજેદેકત્રાન્નં પલલમિવ
ગન્ધલેપનમશુદ્ધલેપનમિવ ક્ષારમન્ત્યજમિવ

વસ્ત્રમુચ્છિષ્ટપાત્રમિવાભ્યઙ્ગં સ્ત્રીસઙ્ગમિવ
મિત્રાહ્લાદકં મૂત્રમિવ સ્પૃહાં ગોમાંસમિવ
જ્ઞાતચરદેશં ચણ્ડાલવાટિકાદિવ સ્ત્રિયમહિમિવ
સુવર્ણં કાલકૂટમિવ સભાસ્થલં શ્મશાનસ્થલમિવ
રાજધાનીં કુંભીપાકમિવ શવપિણ્ડવદેકત્રાન્નં ન
દેવતાર્ચનમ્ । પ્રપઞ્ચવૃત્તિં પરિત્યજ્ય જીવન્મુક્તો ભવેત્ ॥

આસનં પાત્રલોપશ્ચ સંચયઃ શિષ્યસંચયઃ ।
દિવાસ્વાપો વૃથાલાપો યતેર્બન્ધકરાણિ ષટ્ ॥ ૭૯॥

વર્ષાભ્યોઽન્યત્ર યત્સ્થાનમાસનં તદુદાહૃતમ્ ।
ઉક્તાલાબ્વાદિપાત્રાણામેકસ્યાપીહ સંગ્રહઃ ॥ ૮૦॥

યતેઃ સંવ્યવહરાય પાત્રલોપઃ સ ઉચ્યતે ।
ગૃહીતસ્ય તુ દણ્ડાદેર્દ્વિતીયસ્ય પરિગ્રહઃ ॥ ૮૧॥

કાલાન્તરોપભોગાર્થં સંચયઃ પરિકીર્તિતઃ ।
શુશ્રૂષાલાભપૂજાર્થં યશોર્થં વા પરિગ્રહઃ ॥ ૮૨॥

શિષ્યાણાં નતુ કારુણ્યાચ્છિષ્યસંગ્રહ ઈરિતઃ ।
વિદ્યા દિવા પ્રકાશત્વાદવિદ્યા રાત્રિરુચ્યતે ॥ ૮૩॥

વિદ્યાભ્યાસે પ્રમાદો યઃ સ દિવાસ્વાપ ઉચ્યતે ।
આધ્યાત્મિકીં કથાં મુક્ત્વા ભિક્ષાવાર્તાં વિના તથા ॥ ૮૪॥

અનુગ્રહં પરિપ્રશ્નં વૃથાજલ્પોઽન્ય ઉચ્યતે ।
એકાન્નં મદમાત્સર્યં ગન્ધપુષ્પવિભૂષણમ્ ॥ ૮૫॥

તામ્બૂલાભ્યઞ્જને ક્રીડા ભોગાકાઙ્ક્ષા રસાયનમ્ ।
કત્થનં કુત્સનં સ્વસ્તિ જ્યોતિશ્ચ ક્રયવિક્રયમ્ ॥ ૮૬॥

ક્રિયાકર્મવિવાદશ્ચ ગુરુવાક્યવિલઙ્ઘનમ્ ।
સંધિશ્ચ વિગ્રહો યાનં મઞ્ચકં શુક્લવસ્ત્રકમ્ ॥ ૮૭॥

શુક્લોત્સર્ગો દિવાસ્વાપો ભિક્ષાધારસ્તુ તૈજસમ્ ।
વિષં ચૈવાયુધં બીજં હિંસાં તૈક્ષ્ણ્યં ચ મૈથુનમ્ ॥ ૮૮॥

ત્યક્તં સંન્યાસયોગેન ગૃહધર્માદિકં વ્રતમ્ ।
ગોત્રાદિચરણં સર્વં પિતૃમાતૃકુલં ધનમ્ ।

પ્રતિષિદ્ધાનિ ચૈતાનિ સેવમાનો વ્રજેદધઃ ॥ ૮૯॥

સુજીર્ણોઽપિ સુજીર્ણાસુ વિદ્વાંસ્ત્રીષુ ન વિશ્વસેત્ ।
સુજીર્ણાસ્વપિ કન્થાસુ સજ્જતે જીર્ણમમ્બરમ્ ॥ ૯૦॥

સ્થાવરં જઙ્ગમં બીજં તૈજસં વિષમાયુધમ્ ।
ષડેતાનિ ન ગૃહ્ણીયાદ્યતિર્મૂત્રપુરીષવત્ ॥ ૯૧॥

નૈવાદદીત પાથેયં યતિઃ કિંચિદનાપદિ ।
પક્વમાપત્સુ ગૃણ્હીયાદ્યાવદન્નં ન લભ્યતે ॥ ૯૨॥

નીરુજશ્ચ યુવા ચૈવ ભિક્ષુર્નાવસથે વસેત્ ।
પરાર્થં ન પ્રતિગ્રાહ્યં ન દદ્યાચ્ચ કથંચન ॥ ૯૩॥

દૈન્યભાવાત્તુ ભૂતાનાં સૌભગાય યતિશ્ચરેત્ ।
પક્વં વા યદિ વાઽપક્વં યાચમાનો વ્રજેદધઃ ॥ ૯૪॥

અન્નપાનપરો ભિક્ષુર્વસ્ત્રાદીનાં પ્રતિગ્રહી ।
આવિકં વાનાવિકં વા તથા પટ્ટપટાનપિ ॥ ૯૫॥

પ્રતિગૃહ્ય યતિશ્ચૈતાન્પતત્યેવ ન સંશયઃ ।
અદ્વૈતં નાવમાશ્રિત્ય જીવન્મુક્તત્વમાપ્નુયાત્ ॥ ૯૬॥

વાગ્દણ્ડે મૌનમાતિષ્ટેત્કાયદણ્ડે ત્વભોજનમ્ ।
માનસે તુ કૃતે દણ્ડે પ્રાણાયામો વિધીયતે ॥ ૯૭॥

કર્મણા બધ્યતે જન્તુર્વિદ્યયા ચ વિમુચ્યતે ।
તસ્માત્કર્મ ન કુર્વન્તિ યતયઃ પારદર્શિનઃ ॥ ૯૮॥

રથ્યાયાં બહુવસ્ત્રાણિ ભિક્ષા સર્વત્ર લભ્યતે ।
ભૂમિઃ શય્યાસ્તિ વિસ્તીર્ણા યતયઃ કેન દુઃખિતઃ ॥ ૯૯॥

પ્રપઞ્ચમખિલં યસ્તુ જ્ઞાનાગ્નૌ જુહુયાદ્યતિઃ ।
આત્મન્યગ્નીન્સમારોપ્ય સોઽગ્નિહોત્રી મહાયતિઃ ॥ ૧૦૦॥

પ્રવૃત્તિર્દ્વિવિધા પ્રોક્તા માર્જારી ચૈવ વાનરી ।
જ્ઞાનાભ્યાસવતામોતુર્વાનરીભાક્ત્વમેવ ચ ॥ ૧૦૧॥

નાપૃષ્ટઃ કસ્યચિદ્બ્રૂયાન્ન ચાન્યાયેન પૃચ્છતઃ ।
જાનન્નપિ હિ મેધાવી જડવલ્લોકમાચરેત્ ॥ ૧૦૨॥

સર્વેષામેવ પાપાનાં સઙ્ઘાતે સમુપસ્થિતે ।
તારં દ્વાદશસાહસ્રમભ્યસેચ્છેદનં હિ તત્ ॥ ૧૦૩॥

યસ્તુ દ્વાદશસાહસ્રં પ્રણવં જપતેઽન્વહમ્ ।
તસ્ય દ્વાદશભિર્માસૈઃ પરં બ્રહ્મ પ્રકાશતે॥ ૧૦૪॥

ઇત્યુપનિષત્ હરિઃ ૐ તત્સત્ ॥ ઇતિ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

ૐ આપ્યાયન્તુ મામાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ
શ્રોત્રમથો બલમિન્દ્રિયાણિ ચ ॥ સર્વાણિ સર્વં બ્રહ્મોપનિષદં
માહં બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોદનિરાકરણ-
મસ્ત્વનિરાકરણં મેસ્તુ તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે
મયિ સન્તુ તે મયિ સન્તુ । ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ સંન્યાસોપનિષત્સમાપ્તા ॥

*Sanyasa Upanishad*
pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*